# Na Karmaṇā

[KYV – TA 10-12-3]

ॐ न कर्म॑णा न प्रजया॒ धने॑न त्यागे॒नैके , अमृ॒तत्वमा॑न॒शुः ।
परे॑ण॒ नाकं॒ निहि॑तं॒ गुहा॑यां वि॒भ्राजदे॒तद्यत॑यो वि॒शन्ति॑ ।

ॐ na kar'maṇā nap' prajayā dhanēnat' tyāgēnaikē ,
amṛtat'tvamānaśhuḥu ।
parēṇa nākan' nihitaṅ' guhāyāṁ'
vibh'rājadētad'yatayō viśhan'ti ।

वे॒दा॒न्त॒वि॒ज्ञान॒सुनि॑श्चिता॒र्थाः संन्या॑सयो॒गाद्यत॑यः शु॒द्धसत्त्वा॑ः ।
ते ब्रंम्हलो॒॑के तु परा॑न्तका॒ले परा॑मृता॒त्परि॑मु॒च्यन्ति॒ सर्वे॑ ।

vēdān'tavij'ñāna suniśh'chitār'thās'
saṁ'nyāsa yōgād'yatayaśh' śhud'dhasat'tvāāḥa ।
tēb' bram'halōkē tu paraān'takālē
parāmṛtāt'parimuch'yan'ti sar'vēē ।

द॒ह्रं वि॒पा॒पं प॒रमे॑श्मभू॒तं यत्पु॒ण्डरी॒कं पु॒रम॑ध्यस॒ꣳस्थम् ।
त॒त्रा॒पि॒ द॒ह्रं ग॒गनं॑ वि॒शोक॒स्तस्मि॑न्यद॒न्तस्तदुपा॑सित॒व्यम् ।

dah'raṁ' vipāpam' paramēē (a)śh'mabhūtañ'
yat'puṇ'ḍarīkam' puramadh'ya sag'ges'tham ।
tat'rāpi dah'raṅ' gaganaṁ' viśhōkas'
tas'min'yadan'tas' tadupāsitav'yam ।

www.vedanet

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥

yō vēdādaus’ svara[fp]’ prōk’tō vēdān’tē chap’
pratiṣh’ṭhitaḥa ।
tas’yap’ prakṛti līnas’ya ya[fp]’
paras’ sa mahēśh’varaḥa ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www Sai Veda net